दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लतृतीया
ज्येष्ठ 05 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-206 | 1 | मई 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 ३२ नगरीयनिकायेषु काङ्ग्रेसपक्षस्य विजयः, मुख्यमन्त्रिणा अपार-जनसमर्थनाय मतदातॄणां कृतं कार्तज्ञ्यम्

3 हिमाचलप्रदेशे विद्यालयेषु प्रत्येकविद्यार्थिनः कृते कक्षायां न्यूनतमा ७५ प्रतिशतं शारीरिकोपस्थितिः अनिवार्या

4 जयति सर्वदा तावज्ज्ञाभारतीपरम्परा (भारतीयज्ञानपरम्परेति विषयमवलम्ब्य विरचितं लघुकाव्यमिदम्)


## नार्वे-देशेन प्रधानमन्त्री मोदिमहोदयाय सर्वोच्चः सम्मानः प्रदत्तः, अयं तस्य द्वात्रिंशत्तमः (32nd) अन्तर्राष्ट्रियः सम्मानः

**मोदी अवदत्- यूरोपदेशः भारते शत-कोटि (100 बिलियन) डालरपरिमितं निवेशं करिष्यति**



नार्वे-देशस्य राजा हेराल्ड-पञ्चमः प्रधानमन्त्रिणं मोदिमहोदयं स्वकीय-सर्वोच्चसम्मानेन 'ग्रैंड क्रॉस ऑफ द रॉयल नॉर्वेजियन ऑर्डर ऑफ मेरिट' इत्यनेन अलङ्कृतवान्। अयम् नार्वे-देशस्य सर्वोच्चः सम्मानः मन्यते।एतम् सम्मिश्र्य इदानीं यावत् प्रधानमन्त्रिणे मोदिमहोदयाय द्वात्रिंशत् (32) अन्तर्राष्ट्रिय-सम्मानाः प्राप्ताः सन्ति। इतः पूर्वं ह्यः स्वीडन-देशेनापि सः स्वकीय-सर्वोच्चसम्मानेन विभूषितः आसीत्।प्रधानमन्त्री मोदी अद्य नार्वे-देशस्य राजधान्याम् ओस्लो-नगरे नार्वे-देशस्य प्रधानमन्त्रिणा योनास स्टोरे महोदयेन सह संयुक्तां पत्रकारगोष्ठीम् अकरोत्। अस्मिन् अवसरे सः अवदत् यत् गते वर्षे भारतस्य तथा यूरोपियन मुक्तव्यापारसङ्घस्य (EFTA) देशानां मध्ये ऐतिहासिकः व्यापारिक-आर्थिक-सहभागिता-सन्धिः प्रवृत्तः (लागू) अभवत्।मोदिमहोदयस्य अनुसारम्, अयं सन्धिः भारत-नार्वेदेशयोः मध्ये साझा-विकासस्य समृद्धेः च सुदृढः आधारः भविष्यति। अस्य सन्धेः अन्तर्गतं आगामिषु पञ्चदशसु (15) वर्षेषु भारते शत-कोटि (100 बिलियन) डालरपरिमितस्य निवेशस्य तथा दशलक्ष (10 लक्ष) जीविकानां (रोजगार) सर्जनस्य लक्ष्यं निर्धारितम् अस्ति।मई-मासस्य एकोनविंशतितमे (19th) दिनाङ्के ओस्लो-नगरे तृतीयं भारत-नॉर्डिक-शिखरसम्मेलनम् आयोजितं भविष्यति। मोदी अवदत् यत् इदं तस्य नॉर्डिक-समकक्षैः सह मेलनस्य सुवर्ण-अवसरः भविष्यति। अस्मिन् सम्मेलने नार्वे, स्वीडन, डेनमार्क, फिनलैंड तथा आइसलैंड देशानीं नेतारः सम्मिलिताः भविष्यन्ति।इदं भारत-नॉर्डिक-शिखरसम्मेलनम् प्रथमतया २०१८ (2018) तमे वर्षे स्टॉकहोम-नगरे तथा द्वितीयतया २०२२ (2022) तमे वर्षे कोपेनहेगन-नगरे अभवत्। अस्मिन् वारे उपवेशने हरित-ऊर्जा (ग्रीन एनर्जी), अङ्कीकरणम् (डिजिटलाइजेशन), रक्षासहयोगः, जलवायुपरिवर्तनं तथा आर्कटिक-नीतिः सदृशेषु विषयेषु चर्चायाः सम्भावना अस्ति। मोदिमहोदयस्य इयं यात्रा तस्य पञ्चदेशीय-भ्रमणस्य चतुर्थः चरणः अस्ति। इतः पूर्वं सः संयुक्तअरबअमीरात (UAE), नीदरलैंड तथा स्वीडन देशानां भ्रमणं कृतवान्। इतः परं सः इटली-देशं गमिष्यति।

## उत्तरप्रदेशे मन्त्रिमण्डलेन ओ. बी. सी. आयोगस्य संविधानम् अनुमोदितम्

उत्तरप्रदेशे, योगी आदित्यनाथ इत्यस्य मन्त्रिमण्डलेन ओ. बी. सी. आयोगस्य संविधानम् अनुमोदितम्। पञ्चायत-निर्वाचनेषु अन्या-नुन्नत-वर्गस्य आरक्षणस्य कार्यान्वयनार्थं आयोगस्य अनुशंसा सर्वोच्चन्यायालयस्य पूर्वसङ्कल्पः अस्ति। मुख्यमन्त्री योगी आदित्यनाथस्य नेतृत्वे अद्य मन्त्रिमण्डलेन आगरा-लखनऊ-नगरयोः मेट्रो-विस्ताराय, मिर्जापुर्-नगरे एकोनाष्टाविंशतिशतं कोटिरूप्यकाणां पॉवर-ग्रिड् इत्यस्य उन्नयनाय, आर्. एम्. एल्. इत्यत्र सार्धाष्टशतं कोटिरूप्यकाणां चिकित्सालय-सङ्कुलाय च अनुमतिः प्रदत्ता।

### केन्द्रीयस्वास्थ्यमंत्री जे.पी.नड्डः जिनेवानगरे विश्वस्वास्थ्यसङ्घठनस्य महानिदेशकेन डॉ. टेड्रोस महोदयेन सह अमिलत्

केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री-जगत्-प्रकाश-नड्डाः स्विट्ज़रलैण्ड् देशस्य जिनेवा-नगरे आयोजिते ऊनाशितितमे विश्व-स्वास्थ्य-सभायाः अनन्तरं विश्व-स्वास्थ्य-सङ्घटनस्य महानिदेशकेन सह मिलितवान्। सामाजिक-पटले स्वास्थ्य मन्त्रालयेन उक्तं यत्, श्रीनड्डाः पुनः दृढीकृतवान् यत् वैश्विक स्वास्थ्य-समता प्रवर्तयितुं भारतस्य प्रतिबद्धता अस्तीति।

### आयुष-मन्त्रालयः उष्णतरङ्गस्य च विषये विस्तृतं सार्वजनिक-स्वास्थ्य-परामर्श प्राकाशयत्

आयुष्-मन्त्रालयः वर्तमान-ग्रीष्मकालाय अत्यधिक उष्णतया सह उष्णतरङ्गस्य च विषये विस्तृतं सार्वजनिक-स्वास्थ्य-परामर्श प्राकाशयत्। परामर्शत्वेन मन्त्रालयेन उक्तं यत् पर्याप्ततया जलग्रहणं, व्यस्ततायामपि सूर्यप्रकाशस्य प्रत्यक्ष-संसर्गात् निवारणं, विद्युद्विश्लेष्यैः समृद्धानां ऋतुकालिकफलानां द्रवाणाञ्च सेवनं करणीयमिति प्राकथयत्।स्वास्थ्य-परामर्शपत्रे उष्णतरङ्गस्य स्थितिं निवारयितुं आयुर्वेद, सिद्ध, योग, युनानी, होम्योपैथी इत्यादीनां विविध-आयुष-प्रणाल्याः पारम्परिक स्वास्थ्य-निवारक उपायाः अपि समाविष्टाः सन्ति।

### वैश्विक समस्याभिः सह अनिश्चिततासु अपि भारतं द्रुतगत्या प्रगतिं कुर्वदस्ति-गोयलः

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष गोयलः अवदत् यत् वैश्विक समस्याभिः सह अनिश्चिततासु अपि भारतं द्रुतगत्या प्रगतिं कुर्वदस्ति। अद्य नवदिल्ल्यां भारत-व्यापार-महोत्सवस्य अन्तर्जालीयपटलस्य उद्घाटने श्री गोयलः अग्रे गन्तुं उत्साहः कदापि न न्यूनीभवति तथा च सर्वे अविरामं कार्यं कुर्वन्तु इति उक्तवान्।

## काङ्ग्रेस् नेता वी.डी. सतीशनः केरलम इत्यस्य नूतन-मुख्यमन्त्रीरूपेण शपथवचनं स्वीकृतवान्



काङ्ग्रेस् नेता वी.डी. सतीशनः गतप्रातः तिरुअनन्तपुरम्-नगरस्य केन्द्रीय-क्रीडाङ्गणे आयोजिते भव्य-समारोहे केरलम इत्यस्य नूतन-मुख्यमन्त्रीरूपेण शपथवचनं स्वीकृतवान्। राज्यपालः राजेन्द्र विश्वनाथ आर्लेकरः श्रीसतीशनं पदस्य गोपनीयतायाः च शपथं कारितवान्। मुख्यमन्त्रिणा सह एकविंशतिः सदस्याः मन्त्रिपरिषदः कार्यभारं स्वीकृतवन्तः। अस्मिन् कार्यक्रमे काङ्ग्रेस्-पक्षस्य अध्यक्षः मल्लिकार्जुन खरगे, कांग्रेस-दल-नेता राहुलगान्धी, कर्णाटकस्य मुख्यमन्त्री सिद्धारमैया, तेलङ्गाना-राज्यस्य मुख्यमन्त्री रेवन्त रेड्डी, हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिङ्ह सुखुः, केरलस्य भाजपा-पक्षस्य राज्य-अध्यक्षः राजीव चन्द्रशेखरादयः नेतारः उपस्थिताः आसन्। शपथग्रहणसमारोहानन्तरं, नवनिर्मितः सर्वकारः अद्य स्वस्य प्रथमं आधिकारिकं मन्त्रिमण्डलीयोपवेशनम् आहूतवान्।

## सुभाषितम्

**ऐक्यं बलं समाजस्य,**
**तद्भावे स दुर्बलः।**
**तस्मात् ऐक्यं प्रशंसन्ति,**
**दृढं राष्ट्रहितैषिणः।।**

भावार्थः- एकता ही समाज का बल होता है, उसी प्रकार दुर्बल व्यक्तियों का भी बल होता है। इसी कारण जो लोग एक महान और दृढ शक्तिसंपन्न राष्ट्र की कामना करते हैं और हितैषी होते हैं वे समाज में एकता की प्रशंसा और प्रसार करते हैं।






## पश्चिमबङ्ग-सर्वकारस्य मन्त्रिपरिषद् सप्तम-वेतन-आयोगस्य निर्माणाय सिद्धान्ततः अनुमोदनं दत्तवान्

पश्चिमबङ्ग-सर्वकारस्य मन्त्रिपरिषद् विभिन्नेभ्यः सर्वकारीय-सेवारतेभ्यः, अन्येभ्यः राज्य-अनुदान प्राप्त-संस्थानां, विद्यालयानां च कर्मचारिभ्यश्च सप्तम-वेतन-आयोगस्य निर्माणाय सिद्धान्ततः अनुमोदनं दत्तवान्। राज्यस्य महिलाभ्यः जून-मासस्य एक दिनाङ्कतः अन्नपूर्णा-योजना प्रवर्तिता भविष्यति, यस्यान्तर्गतं त्रिसहस्र रूप्यकाणि निर्देश-लाभ-हस्तान्तरणं भविष्यति। कोलकाता-उच्चन्यायालयस्य सद्यः कृत-निर्णयानन्तरं राज्यसर्वकारेण बङ्गालस्य ओ. बी. सीति अन्यवञ्चितवर्गीया सूचिः नूतनरूपेण सज्जी करिष्यते ।

# ३२ नगरीयनिकायेषु काङ्ग्रेसपक्षस्य विजयः, मुख्यमन्त्रिणा अपार-जनसमर्थनाय मतदातॄणां कृतं कार्तज्ञ्यम्



**हिमसंस्कृतवार्ताः- शिमला।**

मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना नगर-निकाय- निर्वाचनेषु काङ्ग्रेसपक्षस्य श्लाघनीये विजये पक्षस्य कार्यकर्तृभ्यः प्रदेशवासिभ्यश्च शुभाशंसाः प्रत्ताः। तेन उक्तं यत् प्रदेशस्य ४७ नगरनिकायेषु जातेषु निर्वाचनेषु काङ्ग्रेस-समर्थित- प्रत्याशिनः ३२ निकायेषु विजयं प्राप्य एतत् प्रमाणितवन्तः यत् जनतायाः काङ्ग्रेस-सर्वकारस्य नीतिषु जनकल्याणकारी-कार्यक्रमेषु च पूर्णः विश्वासः वर्तते। मुख्यमन्त्रिणा अङ्कितं यत् प्रदेशस्य सर्वेषु जनपदेषु काङ्ग्रेस-समर्थित-प्रत्याशिभ्यः व्यापकं जनसमर्थनम् अवाप्तं, यदर्थं तेन मतदातॄणाम् आभारः प्रकटितः। तेन निगदितं यत् जनतायाः एषः विश्वासः काङ्ग्रेस-सर्वकारं अधिकया निष्ठया, समर्पणभावेन, उत्तरदायित्वेन च सह कार्यं कर्तुं प्ररेयति। राज्यसर्वकारः आगामि-काले अपि जनहितकारी-योजनाः प्रभाविरूपेण प्रवर्तय जनेभ्यः तासां लाभं प्रदातुं कटिबद्धः स्थास्यति।

मुख्यमन्त्रिणा सुक्खुमहोदयेन उक्तं यत् काङ्ग्रेसपक्षः समानतायाः, सन्तुलित-विकासस्य, समाजस्य सर्ववर्गाणां कल्याणस्य च विचारधारायां विश्वसिति, एष एव सिद्धान्तः राज्यसर्वकारस्य कार्यशैल्याः आधारः वर्तते। तेन आरोपः कृतः यत् भाजपादलम् धर्म-जाति-आधारेण समाजस्य विभाजनस्य राजनीतिं करोति। तेन कथितं यत् काङ्ग्रेस-पक्षेण २०२२ तमस्य वर्षस्य विधानसभा-निर्वाचन-काले कृताः सर्वाः प्रतिज्ञाः पूरिताः, 'गारण्टी'-योजनाभ्यः च अग्रे गत्वा कार्यं कृतम्। महिलानां, श्रमिकाणां, समाजस्य च अन्तिम-पङ्क्तौ स्थितानां वर्गाणां कल्याणाय अनेकाः योजनाः आरब्धाः, ताः च प्रभाविन्यः कृताः। शिक्षा-स्वास्थ्यक्षेत्रयोः व्यापकाः परिष्काराः विहिताः, येषां सकारात्मकाः परिणामाः अधुना सम्मुखं आयान्ति।

तेन उक्तं यत् ग्रामीण-अर्थव्यवस्थां सुदृढीकर्तुं काङ्ग्रेस-सर्वकारेण गम्भीराः प्रयासाः कृताः। दुग्धस्य समर्थनमूल्ये ऐतिहासिक-वृद्धिः विहिता अस्ति। एतदतिरिच्य प्राकृतिकरूपेण उत्पादितायाः मक्काधान्यस्य, गोधूमस्य, यवस्य, आर्द्र-हरिद्रायाः तथा आर्द्रकस्य अपि समर्थनमूल्यं प्रदीयते। प्रदेशे 'कृषक-आयोगस्य' गठनं कृतम्, अपरतः सेब-उद्यानपालानां बहुवर्षीया याचनां पूरयित्वा 'यूनिवर्सल- कार्टन'- व्यवस्था प्रवर्तिता। मुख्यमन्त्रिणा प्रतिपादितं यत् एतैः सर्वैः पदक्षेपैः कृषकाणाम् उद्यानपालानां च कल्याणं सुनिश्चितं जातं तथा प्रदेशस्य ग्रामीण-अर्थव्यवस्था नूतनं बलं प्राप्तवती। तेन नगरनिकाय-निर्वाचनेषु विजितेभ्यः सर्वेभ्यः प्रत्याशिभ्यः शुभाशंसाः ददता उक्तं यत् अधुना सर्वैः मिलित्वा हिमाचलप्रदेशम् आत्मनिर्भरं, सशक्तं, समृद्धं च कर्तुं कार्यं करणीयम्।

# HP PANCHAYAT ELECTION- कुनिहारक्षेत्रे द्वे मतपत्रे लुप्ते, अष्ट-कर्मचारिणां विरुद्धं प्राथमिकी पञ्जीकृता




**हिमसंस्कृतवार्ताः- सोलनम्।**

हिमाचलप्रदेशे अस्मिन् मासान्ते भवितव्येषु पञ्चायत- निर्वाचनेषु कुनिहार-विकास-खण्डे मतपत्र- लेखनकार्यस्य अन्तराले द्वयोः मतपत्रयोः लुप्तत्वात् प्रशासनिक-अधिकारिषु कोलाहलः सञ्जातः। विषयस्य गाम्भीर्यं विचिन्त्य प्रशासनेन मतपत्र- लेखनकार्ये नियुक्तानां अष्ट-कर्मचारिणां विरुद्धं कुनिहार-आरक्षकथाने प्रकरणं पञ्जीकृतम्। एतेषु सम्बद्धः सहायक-रिटर्निंग-अधिकारी अपि सम्मिलितः अस्ति। अनेन सह एव एते सर्वे कर्मचारिणः निर्वाचन-कर्तव्यात् निष्कासिताः।

**परीक्षण-काले द्वे मतपत्रे लुप्ते प्राप्ते**

सूचनानुसारं 'खनलग'-पञ्चायतस्य चतुर्थ- वार्ड- कृते (वार्ड-४) निर्गते द्वे मतपत्रे परीक्षणसमये लुप्ते प्राप्ते। खण्ड-विकास-अधिकारिणा तथा पञ्चायत- कुनिहारस्य रिटर्निंग-अधिकारिणा तन्मयकंवर-महोदयेन आरक्षकाय प्रेषितायाम् उपालम्भपत्रिकायां स्पष्टीकृतं यत् उक्तपञ्चायते क्रमसङ्ख्या ५२६५५१६ तः ५२६५६७० पर्यन्तं मतपत्राणि निर्गतानि आसन्। अन्वेषण-काले एतेषु क्रमसङ्ख्या ५२६५६६९ तथा ५२६५६७० इति द्वे मतपत्रे न प्राप्ते। उच्यते यत् १६ मई दिनाङ्कतः कुनिहार- विकासखण्ड- मुख्यालये मतपत्र-लेखनकार्यं प्रारब्धम् आसीत्।

## अष्ट- कर्मचारिणः सद्यः प्रभावतः निर्वाचन- कर्तव्यात् निष्कासिताः

अस्मिन् अन्तराले विविधानां पञ्चायतानां कृते सहायक- रिटर्निंग-अधिकारिभ्यः कर्मचारिभ्यश्च मतपत्र- वितरणस्य लेखनकार्यस्य च दायित्वं दत्तम् आसीत्। प्रशासनस्यानुसारं मतपत्र- आबंटनदलेन सम्बद्धाय 'एआरओ' महोदवाय दत्तानां मतपत्राणां परीक्षण-समये द्वे मतपत्रे न्यूने प्राप्ते। अस्य विषयस्य सूचना तत्क्षणं उच्चाधिकारिभ्यः प्रत्ता। ततः परं प्रशासनेन त्वरित- कार्यविधिः कृत्वा सम्बद्धदलस्य विरुद्धं 'एफआईआर' पञ्जीकर्तुं निर्णयः स्वीकृतः।

घटनायाः सम्मुखं आगमनान्तरमेव निर्वाचन- प्रक्रियया सम्बद्धाः अष्ट-कर्मचारिणः सद्यः प्रभावतः निर्वाचन-कर्तव्यात् निष्कासिताः।

नूतनस्य 'एआरओ' महोदयस्य नियुक्तिः अपि कृता

अधिकारिभिः विज्ञापितं यत् 'एफआईआर' प्रतिलिपिं प्राप्य सर्वेषां कर्मचारिणां निर्वाचन- ड्यूटी- आदेशाः निरस्ताः कृताः, ते च स्व-मूलविभागेषु प्रतिप्रेषितुं निर्देशाः निर्गताः। अन्यतः खनलग-ग्रामपञ्चायताय नूतनस्य 'एआरओ' महोदयस्य नियुक्तिः अपि विहिता।

*निर्वाचन-प्रक्रियायाः पारदर्शितां रक्षितुं प्रशासनस्य प्राथमिकता वर्तते। मतपत्रयोः लुप्तत्वं अतीव गम्भीरः विषयः अस्ति। प्रकरणात् सम्बद्धाः सर्वे अभिलेखाः विवरणाणि च आरक्षकाय समर्प्यन्ते।"*

**-तन्मय कंवरः, खण्ड-विकास-अधिकारी, तथा रिटर्निंग-अधिकारी, कुनिहारः**

*मतपत्र-लोपस्य विषये कुनिहार-आरक्षकथाने प्रकरणं पञ्जीकृतं वर्तते। आरक्षकाः अस्य विषयस्य अन्वेषणं कुर्वन्तः सन्ति, सर्वान् पक्षान् च विचिन्त्य आगामि-कार्यविधिः प्रचलिष्यति।"*

**-अशोकचौहानः,डीएसपी (DSP),सोलनम्**

## रक्षामंत्री राजनाथसिंहः वियतनाम-दक्षिणकोरिया-देशयोः यात्रायामस्ति



रक्षामंत्री राजनाथसिंहः वियतनाम-दक्षिणकोरिया-देशयोः यात्रायामस्ति, सः वियतनामदेशस्य हनोई इत्यत्र सम्प्राप्तवान्। वियतनाम-देशस्य प्रवासावधौ राजनाथसिंहः वियतनाम्-देशस्य राष्ट्रिय-रक्षामन्त्रिणा जनरल् फान् वान् जियाङ्ग इत्यनेन सह द्वैपाक्षिकं वार्तालापंकरिष्यति।सामाजिकान्तर्जाली ये पटले मन्त्री अवदत् यत् सः द्वैपाक्षिक-सम्बन्धानां व्याप्तिम् अधिकं विस्तारयितुम् उभयोः देशयोः भ्रमणार्थं उत्सुकः अस्तीति। सः अवदत् यत्, सामरिकसैन्यसहयोगस्य गहनता, रक्षा-औद्योगिकसहभागित्वस्य सुदृढीकरणम्, समुद्रीयसहयोगस्य सम्वर्धनम्, भारत-प्रशान्तक्षेत्रे शान्तेः स्थिरतायाः च प्रोत्साहनं अस्य केन्द्रबिन्दुः भविष्यति।

## केन्द्रीय-गृह-सहकारिता च मंत्री अमितशाहः रायपुरे आधुनिक फॉरेन्सिक्-मोबाईल-यानानां ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्



केन्द्रीय-गृह-सहकारिता च मंत्री अमितशाहः रायपुरे राज्य स्तरीय कार्यक्रमे 'अत्याधुनिक डायल वन वन टू इति आपत्कालीन-प्रतिक्रिया-वाहनानां, आधुनिक फॉरेन्सिक्-मोबाईल-यानानाञ्च ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्। राज्यस्य विभिन्नेषु मण्डलेषु नियोजनार्थं आहत्य चतुश्शत नूतनो-न्नता-पत्कालीन-वाहनानि लोकार्पितवान्। अस्मिन् अवसरे मुख्यमन्त्री विष्णुदेव साई, उपमुख्यमन्त्री विजयशर्मा, छत्तीसगढविधानसभाध्यक्षः रमणसिङ्घश्च उपस्थिताः आसन्।

## पश्चिमबङ्ग-सर्वकारेण कथित-संस्थागत-भ्रष्टाचारस्य अन्वेषणार्थं द्वौ अन्वेषण-आयोगौ निर्मितौ

पश्चिमबङ्ग-सर्वकारेण स्वस्य निर्वाचनस्य प्रतिज्ञानुसारम् कथित-संस्थागत-भ्रष्टाचारस्य, महिला-विरुद्धं अत्याचारस्य च अन्वेषणार्थं द्वौ अन्वेषण-आयोगौ निर्मितौ। मुख्यमन्त्री सुवेन्दु अधिकारी राज्यमन्त्री मण्डलस्य अनुमोदनानन्तरम् अस्य निर्णयस्य घोषणां कृतवान्।

# हिमाचलप्रदेशे विद्यालयेषु प्रत्येकविद्यार्थिनः कृते कक्षायां न्यूनतमा ७५ प्रतिशतं शारीरिकोपस्थितिः अनिवार्या

**हिमसंस्कृतवार्ताः-शिमला।** हिमाचलप्रदेशस्य राजकीयविद्यालयेषु विद्यार्थिनां शैक्षणिकगुणवत्ता- अनुशासनयोः संरक्षणार्थं शिक्षाविभागेन महत्त्वपूर्णाः निर्देशाः निर्गताः। अधुना प्रत्येकविद्यार्थिनः कृते प्रत्येककक्षायां न्यूनतमा ७५ प्रतिशतं शारीरिकोपस्थितिः अनिवार्या भविष्यति। अयं नियमः सैद्धान्तिककक्षासु, प्रायोगिकसत्रेषु पृथक्-पृथक् रूपेण प्रवर्तिष्यते। ये विद्यार्थी निर्धारितां ७५ प्रतिशतोपस्थितिं पूर्णं कर्तुं न शक्नुवन्ति, ते वार्षिकपरीक्षासु उपवेष्टुं न अनुमन्यन्ते।
विद्यालयैः प्रतिमासं उपस्थित्यभावस्य विवरणं सूचनाफलके प्रदर्शनीयम्। निरन्तरानुपस्थित- विद्यार्थिनां पालकान् प्रति समये चेतावनीप्रेषणमपि आवश्यकं भविष्यति। अस्य विषये सोमवासरे प्रदेशीयविद्यालयनिदेशालयेन सर्वेषां उपनिदेशकान् (माध्यमिक/ प्राथमिक/ गुणवत्ता) प्रति निर्देशाः प्रेषिताः।

## शिक्षानिदेशालयस्य निर्देशाः-

निर्देशेषु उक्तं यत् विद्यालयेषु नामाङ्कितविद्यार्थिनां शैक्षणिकप्रदर्शनस्य, अनुशासनस्य च सन्दर्भे अनियमितोपस्थितिः शैक्षणिकमानदण्डानाम् अन्तिममूल्याङ्कने विद्यार्थिनां प्रदर्शनस्य उपरि प्रतिकूलं प्रभावं जनयति। अतः शैक्षणिक- गुणवत्तारक्षणार्थं हिमाचलप्रदेश- माध्यमिक- संहितायाः परिच्छेद २.१९ अनुसारं निर्धारितोपस्थितिनियमाः कठोरतया अनुपालनीयाः।
उपशिक्षानिदेशकाः स्वाधिकारक्षेत्रे अन्तर्गतविद्यालयानां प्रधानाचार्यान्, मुख्याध्यापकान् निर्देशितवन्तः यत् एतेषां नियमाणाम् अनुपालनं सुनिश्चितं क्रियताम्। एतत् विषयं अत्यन्तमहत्त्वपूर्णं मन्यमानाः निदेशालयेन व्यक्तिगतरीत्या अनुपालनं सुनिश्चितं कर्तुं उक्तम्। नियमपालने असफलतायां कठोरानुशासनात्मक- कार्यवाही अपि भविष्यति।

## विद्यालयेषु एते उपस्थितिनियमाः अनिवार्याः

1. प्रत्येकविद्यार्थिना प्रत्येककक्षायां न्यूनतमा ७५ प्रतिशतं शारीरिकोपस्थितिः पूर्णीकरणीया।
2. एषा ७५ प्रतिशतोपस्थितिः सैद्धान्तिककक्षासु तथा प्रायोगिकसत्रेषु पृथक्-पृथक् रूपेण लागू भविष्यति।
3. ये विद्यार्थी एतत् मानदण्डं पूर्णं कर्तुं न शक्नुवन्ति, ते वार्षिकपरीक्षासु उपवेष्टुं निरुद्धाः भविष्यन्ति।
4. संस्थाभिः प्रतिमासं उपस्थित्यभावस्य विवरणं सूचनाफलके प्रदर्शनीयम्।
5. नियमभङ्गं कुर्वतां विद्यार्थिनां पालकान् प्रति समये चेतावनीप्रेषणं करणीयम्।

# कुनिहारदलं पराजित्य टीचर्स- ११ इति दलं पुनः विजेता अभवत्, चमनशर्मा क्रीडापुरुषः इत्यनेन सु सम्मानितः



**हिमसंस्कृतवार्ताः- शिवा शर्मा।** राहु-ग्रामे "यंग स्टार प्रीमियर लीग" इति नाम्ना क्रिकेटक्रीडास्पर्धायाः सफलायोजनं हैप्पी एवं गोलू इत्येताभ्यां कृतम्। अस्यां स्पर्धायां क्षेत्रस्य प्रसिद्धानि ३२ दलानि सहभागितां स्वीकृतवन्तः। स्पर्धायाः अन्तिमा स्पर्धा टीचर्स ११– कुनिहारदलस्य च मध्ये अभवत्। टॉसम् इति विजित्य कुनिहारदलेन प्रथमं क्षेत्ररक्षणस्य निर्णयः कृतः। टीचर्स ११ इति दलेन निर्धारितेषु १२ (षट्कन्दुकचक्रेषु) कन्दुकचक्रेषु सप्तत्रिस्तम्भहान्या (७ विकेट) ११७ धावनाङ्काः अर्जिताः। तेषु राकेशेन ३१, हैप्पी इत्यनेन २५ एवं राजीवेन २४ धावनाङ्काः अर्जिताः। लक्ष्यानुगमनं कुर्वत् कुनिहारदलस्य आरम्भः अतितीव्रः आसीत्। प्रारम्भिकेषु पञ्चकन्दुकचक्रेषु (ओवरेषु) दलं ७० धावनाङ्कान् प्राप्तवान्। किन्तु ततः परं टीचर्स ११ दलस्य कन्दुकक्षेपणकलायाः प्रभावेन कुनिहारदलं १२ कन्दुकचक्रेषु (ओवरेषु) ९ त्रिस्तम्भहानिना केवलं ९२ धावनाङ्कान् एव प्राप्तुं अशक्नोत्, एवं टीचर्स ११ दलं पुनरपि विजेता अभवत्। अन्तिम-क्रीडायां टीचर्स ११ दलस्य राकेशः "मैन ऑफ द मैच" (क्रीडापुरुषः) इति सम्मानं प्राप्तवान्। प्रतियोगितायाः सर्वश्रेष्ठः सर्वश्रेष्ठः दण्डप्रहारकः कुनिहार- दलस्य मनीषः, श्रेष्ठः विकेटरक्षकः इति, सन्नी श्रेष्ठः क्षेत्ररक्षकः टीचर्स ११ दलस्य रविन्द्र कँवरः श्रेष्ठः कन्दुकप्रक्षेपकः एवं प्रतियोगितायाः सर्वश्रेष्ठः क्रीडकः (मैन ऑफ द सीरीज) टीचर्स ११ दलस्य चमनशर्मा चितः। स्पर्धायाः समापनावसरे समाजसेविका आशा परिहारः मुख्यातिथित्वेन उपस्थितवती। तया युवानः क्रीडां क्रीडाभावनया क्रीडितुं एवं मादकद्रव्येभ्यः दूरं स्थातुं प्रेरिताः।मुख्यातिथिना विजेतृदलाय स्मृतिचिह्नसहितं ₹ ५१,००० पारितोषिकराशिः एवं उपविजेतृदलाय स्मृतिचिह्नसहितं ₹३१,००० पारितोषिकराशिः प्रदत्ता। दलद्वयस्य कृते च शुभकामनाः प्रदत्ताः।

# भ्रष्टाचार-माफिया-शासने जनतायाः तीक्ष्णः प्रहारः- जयरामठाकुरः






**हिमसंस्कृतवार्ताः- शिमला।** पूर्वमुख्यमन्त्रिणा प्रतिपक्षनेत्रा च जयरामठाकुरेण स्थानीय-निकाय-निर्वाचनेषु भारतीयजनतापक्षस्य प्रचलविजये प्रदेशवासिभ्यः कार्तज्ञ्यं ज्ञापयता उक्तं यत् एषः परिणामः मुख्यमन्त्रिणः सुखविन्दरसिंह- सुक्खुमहोदयस्य नेतृत्वयुक्तस्य काङ्ग्रेस- सर्वकारस्य विफलतां, भ्रष्टाचारं, अराजकतां, माफिया-शासनं च जनतया पूर्णरूपेण तिरस्कृतस्य स्पष्टः सङ्केतः अस्ति।
शिमलास्थे भाजपामुख्यालये "दीपकमलम्" इत्यत्र पक्षस्य अधिकारिभिः कार्यकर्तृभिः च सह विजयोत्सवम् आचरता जयरामठाकुरेण कथितं यत् प्रदेशस्य जनता काङ्ग्रेस-सर्वकारस्य असत्य- प्रतिश्रुतिभिः, जनविरोधी- निर्णयैः, कुशासनेन च पूर्णतः त्रस्ता वर्तते। प्रदेशे विधि-व्यवस्था निरन्तरं विकृता जाता, माफिया-तत्त्वेभ्यः संरक्षणं प्राप्तम्, भ्रष्टाचारेण च शासनव्यवस्था शिथिलीकृता। स्थानीय- निकाय- निर्वाचनानां परिणामैः एतत् सिद्धम् अभवत् यत् जनता इदानीं काङ्ग्रेस-सर्वकारं सत्तायाः निष्कासयितुं मनः कृतवती अस्ति। मुख्यमन्त्री असत्यवादी अस्ति, तस्य उपरि तस्यैव मन्त्रिणः अपि विश्वासं न कुर्वन्ति। मुख्यमन्त्री निर्वाचनस्य परिणामं जानाति स्म, अस्मादेव कारणात् सः निर्वाचनात् पलायनं करोति स्म। अधुना सः परिणामैः विचलितः अस्ति, ममता बनर्जी- महोदया इव वार्तां करोति। तेन अद्यतनः आगामी च जनादेशः स्वीकार्यः।
प्रतिपक्षनेत्रा उक्तं यत् एषः विजयः केवलं भाजपादलस्य निर्वाचन- सफलता एव न, अपि तु भाजपां प्रति प्रदेशवासिनां विश्वासस्य तथा काङ्ग्रेस- सर्वकारस्य विरुद्धं तीव्र-जनाक्रोशस्य प्रतीकः अस्ति। जनता मुख्यमन्त्रिणः असत्यं, भ्रमं, प्रचार- राजमीतिं च पूर्णतः अस्वीकृतवती। जयरामठाकुरेण प्रतिपादितं यत् मुख्यमन्त्री स्वपराजयस्य अनुमानं पूर्वमेव कृतवान् आसीत्। एतदेव कारणम् आसीत् यत् काङ्ग्रेस-सर्वकारः निरन्तरं स्थानीयनिकायनिर्वाचनात् पलायनं करोति स्म, माननीय-न्यायालयस्य आदेशानन्तरमेव निर्वाचनानि कारणीयानि अभवन्। अधुना निर्वाचनपरिणामैः स्पष्टं जातं यत् प्रदेशस्य जनतायाः काङ्ग्रेस-सर्वकारात पूर्णरूपेण मोहभङ्गः संवृत्तः।प्रतिपक्षनेत्रा अस्मिन् ऐतिहासिके विजये योगदानं दत्तवद्भिः सर्वेभ्यः कार्यकर्तृभ्यः, अधिकारिभ्यः, समर्थकेभ्यः च हार्दिकाः शुभाशंसाः प्रदाय प्रदेशस्य देवतुल्यायाः जनतायाः हृदयेन आभारः प्रकटितः। तेन विश्वासः प्रकटितः यत् आगामि-काले प्रदेशस्य अन्येषु निर्वाचनेषु अपि जनता भाजपा- दलाय अधिकं समर्थनं प्रदाय काङ्ग्रेस-सर्वकाराय तीक्ष्णम् उत्तरं दास्यति। अस्मिन् अवसरे तेन सह भाजपा- प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः, प्रदेशसङ्गठनमन्त्री सिद्धार्थन्, प्रदेशकोषाध्यक्षः कमलसूदः, किसानमोर्चा-प्रदेशाध्यक्षः सञ्जीवदेष्टा, प्रदेशमीडिया संयोजकः कर्णनन्दः, शिमला- जिलाध्यक्षः केशवचौहानः इत्यादयः अन्ये अधिकारिणः कार्यकर्तारश्च उपस्थिताः आसन्।



हिमसंस्कृतवार्ता

असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतंमधुरं सदा -३०

सीतारामयोः परमप्रेमिणः श्रीहनुमतः जीवनचरितम् अतीव असाधारणम् अनुपमेयं च वर्तते, सामान्यचिन्तनेन, सहजभाषया वा तद्वर्णयितुम् अशक्यमेव । रामनाम्नः अत्यन्तप्रेमी हनुमान् सदैव अनवरतञ्च नामस्मरणं सङ्कीर्तनञ्च कुर्वन् रामसेवायां संलग्नः भवति स्म । तेन रामकृपया असाधारणं कार्यं कुर्वता लोकादर्शः स्थापितः। हनुमत्सदृशः परमज्ञानी, परमवीरः, परमसेवकः च न भूतो न भविष्यति । यतोहि सः स्वयं रुद्रावतारः वर्तते । तस्य जीवनचरितविषये अत्र किञ्चित् प्रस्तूयते ।

वाल्मीकिकृतस्य रामायणस्य अन्तिमभागे उपलभ्यते यत् भगवतः श्रीरामस्य स्वधाम-गमनसमये, हनुमान् अङ्गीकृतवान् आसीत् यत् - 'यावत् पृथ्व्यां रामकथायाः अस्तित्वं स्यात् तावत् भूतले निवसामि' इति । रामनाम्नः तथा रामगुणगानस्य अत्यन्तं प्रेमी आसीत् हनुमान् । यत्र यत्र प्रभोः नामयशश्चरित्रं, कीर्तनकथादिकं भवति, तत्रैव सः तत्क्षणात् हि उपस्थितः भूत्वा अतीव विनम्रतापूर्वकञ्च तत् श्रवणं करोति, अद्यापि । श्रीहनुमतः नामप्रेमकथाः बहुधा उपलभ्यन्ते । आनन्द-रामायणे हनुमतः सर्वशक्तीनां मूलं 'रामनाम' इत्येव प्रदर्शितमस्ति । तस्मात् कारणाद्धि सः सीतान्वेषणे सफलतां गतः । भागवते उल्लिखितं प्राप्यते यत् किम्पुरुषवर्षे स्थित्वा हनुमान् गन्धर्वेभ्यः सदा रामकथाम् शृणोति स्म । रामरहस्योपनिषदि अपि तस्य अन्तःकरणे स्थितं नामप्रेम, एवं भक्तानां रक्षणमिति विषये विस्तृतचर्चा कृता प्राप्यते । लङ्काविजयस्य अनन्तरम्, यदा अयोध्यायां श्रीरामस्य राज्याभिषेकमपि सम्पन्नमासीत्, तत्समये रामानुज्ञया भगवती सीता हनुमतः उपकारं संस्मृत्य स्वयं धृतां कण्ठमालां निष्कास्य प्रेमातिशयेन, कृतज्ञतापूर्वकम्, उपहारत्वेन च तां मालां हनुमत्कण्ठे निक्षिप्तवती । मालेयं अयोध्या-रत्नागारस्य श्रेष्ठा मणिमाला आसीत् । देवराजः इन्द्रः यदि तादृशीं मालां प्रापयिष्यत् तर्हि आत्मानं सौभाग्यवन्तम् अमंस्त । तादृशी अमूल्या मणिमालेयम् । स्वकण्ठे मणिमालाम् अवलोक्य हनुमान् चकितः इव जातः । भगवता किं वा अद्भुतं वस्तु दत्तं मह्यमिति तेन मनसि एव चिन्तितम् । अनेन मम किं वा साध्येत इति विचार्य, तत्परीक्षणार्थं तेन मालास्थः एकैकशः मणिः वज्रवद् दन्तैः त्रोटितुम् आरब्धः । राजसभायाम् उपस्थिताः सर्वे जनाः तद्दृश्यं कुतूहलेन पश्यन्तः आसन् । सर्वेषां दृष्टिः हनुमदुपरि आसीत् । एवं प्रकारेण हनुमता स्वदन्तैः सर्वे मणयः एकैकशः नष्टीकृताः, भूमौ च ते क्षिप्ताः जाताः । 'भवान् एतान् सुरदुर्लभान् अलभ्यान् परममूल्यवतः मणीन् कस्मात् हेतोः नष्टीकृतवान् ?' इति विभीषणः तं पृष्टवान् । कारणं विभीषणस्य कृतेऽपि एतत्कार्यम् असह्यमासीत् । 'एषु मणिषु न तु श्रीसीतारामयोः साकारविग्रहः दृश्यते, न वा तयोः नाम हि । यत्र एतन्न विद्यते, तत्र केवलं पाषाणमात्रस्य किं मूल्यम् ? तयोः महामूल्यतां हि अत्राहं मार्गयन्नस्मि ।' इति अत्यन्तं सरलभावेन हनुमान् उत्तरं दत्तवान् विभीषणाय । अतः हनुमान् सदृशः भगवन्नामप्रेमी लोके न कदापि भूतवान् न भविष्यति । उक्तमस्ति -

**'यत्र यत्र रघुनाथकीर्तनं**
**तत्र तत्र कृतमस्तकाञ्जलिम् ।**
**वाष्पवारिपरिपूर्णलोचनं**
**मारुतिं नमत राक्षसान्तकम् ॥'**

तस्मात् श्रीहनुमान् मनुष्यमात्रस्य सदैव अनुकरणीयः, सेव्यः च वर्तते । तस्य समस्तः जीवनादर्शः मनुष्यस्य कृते स्वीकरणीयः, परिपालनीयश्च अस्तीति, शुभमस्तु ।

# जयति सर्वदा तावज्ज्ञाभारतीपरम्परा (भारतीयज्ञानपरम्परेति विषयमवलम्ब्य विरचितं लघुकाव्यमिदम्)



ऋग्यजुःसामगानन्नु ह्यथर्वश्च चतुष्टयम्
उपनिषत्सु संलीनं ब्रह्मज्ञानं सनातनम् ।१।
शिक्षाकल्पो निरुक्तञ्च व्याकरणं महद्धनम्
छन्दोज्योतिषशास्त्रन्नु षडङ्गत्वेन वै स्मृतम् ।२।
गीता रामायणञ्चैव महाभारतमुत्तमम्
धर्मकर्मप्रकाशेन विश्वकल्याणकारकम् ।३।
अष्टादशपुराणेषु कथादिव्यतरङ्गिणी
काव्यसाहित्यधाराभिस्संसिक्तो भारतमणिः ।४।
हस्तकारुकलाशिल्पं चित्रविद्या च सुन्दरी
ललितरूपविन्यासैस्संस्कृत्या शोभते मही ।५।
नृत्यविद्या च सङ्गीतं ललितं भाववर्धनम्
नाट्यरूपप्रयोगेण समाजेष्वपि रञ्जनम् ।६।
धनुर्विद्याबलोपेता रक्षानीतिमती यदा
शौर्यत्यागप्रतिष्ठाभ्यां राष्ट्रं रक्षति सर्वदा ।७।
आयुर्विद्या प्रदात्री सा स्वास्थ्यं जीवनमुत्तमम्
प्रकृतेर्वरदानेन रोगनाशं करोति शम् ।८।
खगोलमण्डलाज्ञानं भूगोलस्यापि संस्थितिः
ऋषीणामपि विज्ञप्तिर्विज्ञाता तत्त्वतो मितिः ।९।
गणितं शून्यमाहात्म्यं ज्यामितिःक्षेत्रमापनम्
सङ्ख्याशास्त्रप्रबोधेन सुखं विन्दति जीवनम् ।१०।
अर्थनीतिस्समृद्ध्यर्थं राजनीतिस्सुशासने
प्रजापालनयुक्तन्तु न्यायशास्त्रं विचारणे ।११।
कामशास्त्रं गृहस्थाय दर्शनं मोक्षतागते
योगभोगसमाकारो भारते एव लभ्यते ।१२।
सांख्यं वैशेषिको योगो वेदान्तदर्शनं मतम्
आत्मज्ञानप्रदीपाय बुद्धिं प्रक्षालयन्ति शम् ।१३।
कर्मकाण्डेन शुद्धिस्स्याद्रत्नविद्या तु भूतिदा
दैविकं मानुषञ्चैव बलं पुष्णाति सर्वथा ।१४।
पत्रकारगता शिक्षा सत्यवाक्यप्रबोधिनी
जनसञ्चारसापेक्षा राष्ट्रजागृतिकारिणी ।१५।
रसयुक्ता सुसंस्कारा पाकविद्याऽपि पावनी
स्वास्थ्यप्रदाऽन्नपूर्णेति कला सा सुखदायिनी ।१६।
वेदाध्यात्मतरङ्गिणी लसति नस्संवित्प्रवाहे यदा
विज्ञानं गणितञ्च सर्वनिगमास्तिष्ठन्ति तस्यां मुदा
सत्याज्ञप्तिरनन्ता त्वप्रतिहता लोकप्रभावाहिनी
मान्या सा विमला परम्परा ननु ज्ञाभारती पावनी ।१७।
इत्थं हि विविधारूपैःकलाविज्ञानदर्शनैः
ज्ञाभारती परिपूर्णा परम्परा च संस्कृतैः ।१८।
एषा ज्ञानमयी गङ्गा त्रिलोकपावनी वरा
मोक्षसौख्यसमाकारा ज्ञाभारतीपरम्परा ।१९।
ऋषिसङ्घैस्समानीता विद्यादिव्यतरङ्गिणी
मयैषा सूत्रिता ह्यत्र लोकानां हितकारिणी ।२०।
पुरा प्रोक्ता पवित्रेयं सर्वविद्यासमस्वरा
जयति सर्वदा तावज्ज्ञाभारतीपरम्परा ।२१।
ज्ञानरत्नमयी माला गुम्फिता सादरं मया
सानन्दं परिगृह्णन्तु सुधियो बान्धवाचयाः ।२२।

रचयिता- आचार्यः डा. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# "बोधकथा"

## जीवनपाठः

"ये अस्माकं मूल्यं न जानन्ति तेभ्यः दूरं तिष्ठन्तु" मृत्योः पूर्वं पिता पुत्रमब्रवीत्, मम पितामहः मह्यं एतां घटिकाम् अयच्छत्। एषा घटिका द्विसहस्र- वर्षेभ्यः पुरातनी अस्ति। अहं तुभ्यम् एतां घटिकां ददामि, त्वं सुवर्णालङ्कारस्य आपणं गत्वा केवलं मूल्यं पृष्ट्वा प्रत्यागच्छतु। तदनुसारेण सः आपणं गत्वा मूल्यं पृष्टवान्। प्रत्यागत्य स्वपितरम् अवदत्- एतया घटिकायाः मूल्यं शताधिकपञ्चाशत् [१५०] इति आपणिकेन उक्तः। आपणिक उक्तवान् एषा घटिका बह्वी पुरातनी अस्ति इति उक्तम्। पिता अवदत् अस्तु। पिता पुत्रम् आदिशत् इदानीं त्वं त्याज्यवस्तूनि आपणं गच्छतु। पित्रादेशानुसार पुत्र त्याज्यवस्तूनि आपणं गत्वा घटिकायाः मूल्यं अपृच्छत्। तेन केवलः विंशति [२०] रुप्यकाणि इति उक्तः। इदानीं पिता पुत्रम् अवदत् अधुना सङ्ग्रहालये गच्छतु। पुत्र सङ्ग्रहालयम् अगच्छत्, तदनन्तरं सः अत्यान्देन गृहम् प्रत्यागतः। पितरम् उक्तवान्- सङ्ग्रहालयस्य व्यवस्थापकः एतां घटिकां दुर्लभां मत्वा अमूल्यानि वस्तूनि सङ्ग्रहे स्थानं दत्ता, पञ्चलक्षरुप्यकाणि [५ लाख] दातुं प्रस्तावः। पिता स्मितहास्यं कृत्वा अवदत्- योग्यस्थाने एव युष्माकं योग्यं मूल्यं भवति। स्वमूल्यं विपरीत स्थाने मा अन्विष्यतु।

**"काकः कृष्णः पिकः**
**कृष्णस्त्वभेदः पिककाकयोः।**
**वसन्ते समुपायते काकः काकः पिकः पिकः।"**

डॉ. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्




**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्यतनी प्रथमा वार्ता अतीव विचित्रा अस्ति।

छत्तीसगढ-राज्ये चौरैः कश्चन अपराधः कृतः। तैः कार्यालयस्य जलनलिकाः चोरिताः, भूमौ च 'त्वयि स्निह्यामि' इति सन्देशः आलिखितः।

**नन्दिनी-** सत्यम्, एतद् हास्यकरम् अस्ति यत् चौराः चौर्य-काले अपि अनुरागं प्रकटितवन्तः सन्ति। अपरं वृत्तं शृणु। पेरिसनगरे एकस्य क्षुद्रतमस्य गृहस्य दृश्यं प्रसारितम्। तत्र गन्तुं चतुस्त्रिंशदधिकशतं सोपानानि आरोढव्यानि सन्ति। तस्य मासभाटकं षट्षष्टि-सहस्राणि रूप्यकाणि सन्ति।

**काव्या-** तावत् धनं दत्त्वा अपि प्रतिदिनं तावत् कष्टं सोढव्यम् इति आश्चर्यकरम्।

अधुना उत्तराखण्डस्य वार्ता। पुरातत्त्व-विभागेन राज्यस्य चतुर्णां प्राचीन- स्थानानां जीर्णोद्धारः करिष्यते। एतैः स्थानैः पुनः नूतनत्वं प्राप्स्यते।

**नन्दिनी-** प्राचीन-गौरवस्य रक्षणं तु अत्यन्तं सुखदं कार्यम्।

अन्तिमा वार्ता भीषणा अस्ति। अमेरिकादेशस्य कश्चन कोटीश्वरः व्याधः गजवधाय वनं गतः। तत्र क्रुद्धेन गजेन सः मर्दितः। तेन तत्रैव प्राणत्यागः कृतः।

**काव्या-** यः अन्येषां हननाय गतः, सः एव गजेन हतः इति दैवस्य लीला। अद्य एतावदेव।